बाह्याः पञ्च तुष्टयो बाह्यविषयेषु पञ्चसु शब्दादिष्वर्जनर-
क्षणक्षयभोगहिंसादिदोषनिमित्तकोपरमाज्जायन्ते । ताश्च
तुष्टयो यथाक्रमं पारं सुपारं पारापारमनुत्तमाम्भ
उत्तमाम्भ इति परिभाषिता इति । कश्चित् त्विमां
कारिकामन्यथा व्याख्यातवान् । तद्यथा विवेकसाक्षा-
त्कारोऽपि प्रकृतिपरिणाम एवेत्यलं ध्यानाभ्यासेनेत्येवं
दृष्ट्या या ध्यानादिनिवृत्तौ तुष्टिः सा प्रकृत्याख्या ।
प्रव्रज्योपादानेनैव मोक्षो भविष्यति किं ध्यानादिनेति या
तुष्टिः सोपादानाख्या । कृतसन्न्यासस्यापि कालेनैव
मोक्षो भविष्यत्यलमुद्वेगेनेति या तुष्टिः सा कालाख्या ।
भाग्यादेव मोक्षो भविष्यति न मोक्षशास्त्रोक्तसाधनैरेवं
कुतर्के या तुष्टिः सा भाग्याख्येत्यादिरर्थ इति तन्न ।
तद्व्याख्याततुष्टीनामभावस्य ज्ञानाद्यनुकूलत्वेनाशक्तिपरि-
भाषानौचित्यादिति" ।

तुष–कर्त्तरि क्तिच् । ५गौर्य्यादिषु षोड़शसु मातृषु
मध्ये मातृभेदे । कुलदेवताशब्दे २१३० पृ० दृश्यम् ।
६अनन्तदेवपत्न्याञ्च । "अनन्तपत्नी तुष्टिश्च पूजिता
वन्दिताऽभवत् । यया विना न सन्तुष्टाः सर्वे
लोकाश्च सर्वतः" देवीभा० । "या देवी सर्वभूतेषु तुष्टि-
रूपेण संस्थिता" देवीमाहा० । "आचारश्चैव साधूना-
मात्मनस्तुष्टिरेव च" मनुः ।

**तुष्टिमत्** त्रि० तुष्टिरस्त्यस्य मतुप् । तोषयुक्ते । स्त्रियां
ङीप् । २उग्रसेनात्मजे कंसभ्रातरि पु० "कंसः सुनामा
न्यग्रोधः कङ्कः शङ्कुः सुहूस्तथा । राष्ट्रपालोऽथ
सृष्टिश्च तुष्टिमानुग्रसेनजाः" भाग० ६।२४।१४ ।

**तुष्टु** पु० तुष–बा० तुक् । कर्णस्यमणौ शब्दच० ।

**तुष्य** पु० तुष–कर्त्तरि क्यप् । १महादेवे तुटितुटशब्दे दृश्यम्

**तुस** ध्वनौ भ्वा० पर० सक० सेट् । तोसति अतोसीत् ।
तुतोस ।

**तुस** पु० तुष+पृषो० । तुषे धान्यत्वचि रमानाथः ।

**तुस्त** न० तुस–क्त बा० इड़भावः । १रेणौ कमरे बुस्तेत्यत्र
तुस्तेति पाठं मत्वा सारसुन्दर्य्यां व्याख्यातम् ।

**तुह** अर्द्दने बधे भ्वा० पर० सक० सेट् । तोहति । इरित्
अतुहत् अतोहीत् । । तुतोह ।

**तुह(हा)र** पु०तुह–बा० करन् कारन् वा । कुमारपारिषद-
भेदे । "तुहरश्च तुहारश्च चित्रदेवश्च वीर्य्यवान्" भा०
स० ४६ अ० । कुमारपारिषदोक्तौ ।

**तुहिन** न० तुह्यतेऽनेन तुह–इनन् ह्रस्वश्च । १हिमे अमरः
२चन्द्रतेजसि उज्ज्वल० "तृणान्तलग्नैस्तुहिनैः पतद्भिः"
कुमारस० "सान्द्रस्तुहिनान्तरितः" प्रबोधच० ।

**तुहिनकर** पु० तुहिनं करोऽस्य । १चन्द्रे तुहिनांशुप्रभृत-
योऽप्यत्र ।२कर्पूरे च ।

**तुहिनांशुतैल** न० ६त० । कर्पूरतैले राजनि० ।

**तुहिनाचल** पु० ६त० । हिमालये तुहिनाद्रिप्रभृतयोऽप्यत्र ।

**तुहुण्ड** पु० दनुवंश्ये दानवभेदे । "अश्वग्रीवश्च सूक्ष्मश्च
तुहुण्डश्च महाबलः । एकपादेकचक्रश्च विरूपाक्षमहो-
दरौ । निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा । शरभः
शलभश्चैव सूर्य्यचन्द्रमसौ तथा । एते ख्याता दनो-
र्वंशे दानवाः परिकीर्त्तिताः" भा० आ० ६५ अ० ।
२धृतराष्ट्रपुत्रभेदे "नन्दको बाहुशाली च तुहुण्डोविक-
टस्तथा" १८६ क० ।

**तूड** अनादरे भ्वा० पर० सक० सेट् । तूडयति अतूडीत् ।
तुतूड । ऋदित् । णिच् अतुतूड़त् त ।

**तूण** सङ्कोचे अद० चुरा० उभ० सक० सेट् । तूणयति ते ।
अतुतूणत् त ।

**तूण** सङ्कोचे चु० उभ०सक०सेट् । तूणयति ते अतूतुणत् त ।

**तूण** पूरणे चु० आ० सक० सेट् । तूणयते, अतूतुणत् त ।

**तूण** पु० तूण्यते पूर्य्यते बाणैः तूण–पूरणे कर्म्मणि घञ् ।
इषुधौ बाणाधारे अमरः ।

**तूणक** न० "तूणकं भवेदिदं रजौ रजौ ततश्च रः" वृ० र०
टीकोक्ते पञ्चादशाक्षरपादके छन्दोभेदे ।

**तूणधार** पु० तूणं धारयति धारि–अण् उप० स० । तूणधा-
रिणि धानुष्के । अस्य नियुक्तत्वात् "अणि नियुक्ते" पा०
न आद्युदात्तत्वम् । किन्तु तत्पुरुषस्वरः ।

**तूणव** पु०तूणस्तदाकारोऽस्त्यस्य केशा०व तूणं तदाकारं वाति
वा–क वा । तूणाकारे वाद्यभेदे । "सैषा वाग् वनस्प-
तिषु वदति या दुन्दुभौ या तूणवे या वीणायाम्" तै०
स० ६।१।४।१ । "वीणावादं क्रोशाय तूणवध्ममवरस्प-
राय" यजु० ३०।१९ । "तूणवं वाद्यभेदं धमति तथा-
भूतम्" वेददी० । "वीणावादं पाणिघ्नं तूणवध्मं ता-
न्नृत्तायानन्दाय" यजु० ३०।२० ।

**तूणवत्** त्रि० तूण+अस्त्यर्थे मतुप् मस्य वः । १तूणयुक्ते
धानुष्के "सायुधा बहुनिस्त्रिंशास्तूणवन्तः संमार्गणाः"
भा० व० ६अ० । ठन् । तूणिक इनि तूणिन् तत्रार्थे
त्रि० इन्यन्तस्य स्त्रियां ङीप् । तूणिन् । नन्दिवृक्षे पु०
राजनि० ।